SANA

Sem-4

CC-9 - Section-A



१. राज्याभिषेकमिति काव्यं केन विरचितम्? को वा काव्यस्यास्य प्रकाशकालः?
- पण्डितवरेण यादवेश्वरतर्करत्नेन विरचितं राज्याभिषेकमिति काव्यं १९१२ ईशवीयाब्दे प्रकाशितम्।

२. राज्याभिषेककाव्यस्य काव्यस्य उपजीव्यं किम्?
- १९०२ ईशवीयाब्दे अनुष्ठितः महाराज्ञ्याः भिक्टोरियायाः पुत्रस्य सप्तम-एडओयार्डमहोदयस्य राज्याभिषेकः एव काव्यस्यास्य वर्णनीयं वस्तु।

३. विजयिनीकाव्यं केन विरचितम्?
- पण्डितेन श्रीश्वरविद्यालङ्कारमहोदयेन विजयिनीकाव्यं विरचितम्।

४. विजयिनीकाव्यस्य विषयवस्तु किम्?
- विजयिनीकाव्ये कविना श्रीश्वरविद्यालङ्कारेण महाराज्ञ्याः भिक्टोरियायाः जीवनस्य सम्भिक्तकं वर्णनं कृतम्। काव्येऽस्मिन् तत्कालिकायाः युरोपीयसभ्यतायाः विशदः परिचयोऽपि दीयते।

५. विजयिनीकाव्यं कस्मै उत्सर्गीकृतम्?
- पश्चिमवङ्गस्य कोचविहारप्रदेशस्य राज्ञे नृपेन्द्रनारायणभूपबाहादुराय विजयिनीकाव्यमुत्सर्गीकृतम्।

६. ऐतिहासिकतया विशिष्टस्य कस्य वस्तुनः विवरणं विजयिनीकाव्ये प्रदत्तम्?
- विजयिनीकाव्यस्य एकादशे सर्गे, भारतवर्षादेव आहृतस्य 'कोहिनूर' इत्याख्यस्य हीरकस्य विवरणमस्ति।

७. योगिभक्तचरितमिति काव्यस्य किं विषयवस्तु?
- युगाचार्यस्य महर्षिनगेन्द्रनाथस्य पुण्यं जीवनमाश्रित्य महामहोपाध्यायः कालीपदतर्काचार्यमहोदयः योगिभक्तचरितमिति विंशसर्गात्मकं काव्यं व्यरचयत्।

८. कालीपदतर्काचार्यस्य छद्मनाम किमासीत् ?
- कालीपदतर्काचार्यस्य छद्मनाम आसीत् 'काश्यपकविः' इति ।

९. श्रीरामकृष्णचरितमिति काव्यस्य वर्णनीयः विषयः कः ?
- श्रीरामकृष्णपरमहंसस्य पावनं जीवनवृत्तमाश्रित्य कविवरेण दीनानाथत्रिपाठीमहोदयेन श्रीरामकृष्णचरितमिति काव्यं विनिर्मितम् ।

१०. श्रीच श्रीजीवन्यायतीर्थेण (ण) विरचितेषु चरितकाव्येषु यथेच्छं द्वयोः नाम लिखतु ।
- 'श्रीशङ्कराचार्यवैभवम्' 'विवेकानन्दचरितञ्चेति ।

११. कालिदासस्य जीवनमाश्रित्य श्रीजीवन्यायतीर्थेण विरचितस्य नाटकस्य नाम किम् ? अत्र कति अङ्काः सन्ति ?
- महाकविकालिदासमिति नाटकं ~~श्रीज~~ श्रीजीवन्यायतीर्थेण विरचितं कालिदासजीवनाश्रितं काव्यम् । नाटकमिदं पञ्चाङ्कम् ।

१२. महाकविकालिदासमिति नाटकं सर्वप्रथमं कुत्र प्रकाशितम् ?
- महाकविकालिदासमिति नाटकं १९६३-६४ ईशवीयाब्दे प्रणवपारिजातम् इत्याख्यायां पत्रिकायां प्रथमं प्रकाशितम् ।

१३. निगमानन्दसरस्वतीमहाभागस्य चरितमवलम्ब्य श्रीजीवाचा-र्येण किं नाटकं विनिर्मितम् ? नाटकमिदं कुत्र प्रकाशितम-भवत् ?
- निगमानन्दसरस्वतीमहाशयस्य चरितमाश्रित्य श्रीजीवन्याय-तीर्थेण निगमानन्दचरितमिति नाटकं विरचितम् । नाटकमिदं हालिशहरस्थितात् निगमानन्द-आश्रमात् प्रचारितायाम् आर्यदर्पणमिति पत्रिकायां प्रथमं प्रकाशित-मभवत् ।

१४. चाणक्यविजयमिति नाटकं केन विरचितम् ? नाटकस्यास्य अङ्कसंख्या का ?
- चाणक्यविजयमिति नाटकं पण्डितप्रवरेण विश्वेश्वरविद्या-भूषणेन विरचितम् । नाटकमिदं सप्ताङ्कम् ।

Scanned with CamScanner

२५. चाणक्यविजयमिति नाटकस्य भाषाव्यवहारे किं वैशि-
-ष्ट्यमस्ति ?

- चाणक्यविजयमिति नाटके पात्रनिर्विशेषेण लिङ्गनिर्वि-
-शेषेण सर्वेषामेव कुशीलवानां भाषा संस्कृतम्; नाटके-
-स्मिन् कुत्रापि प्राकृतवाचः प्रयोगः न विहितः ।

२६. भारतलक्ष्मीनाटकं केन रचितम् ? नाटकमिदं कस्मिन्नब्दे
प्रकाशितमभवत् ?

- भारतलक्ष्मीनाटकं श्रीमता यतीन्द्रविमलचौधुरीमहोदयेन
विनिर्मितम् । झान्सीराज्ञीलक्ष्मीबाईचरित्राधारितमिदं
नाटकं १९६७ ईशवीयाब्दे प्रकाशितमभवत् ।

२७. यतीन्द्रविमलस्य भास्करोदयमिति काव्यं किमवलम्ब्य रचितम्?

- यतीन्द्रविमलचौधुरीमहाभागस्य भास्करोदयमिति पञ्चदशा-
-ङ्कं महानाटकं विश्वकवेः रवीन्द्रनाथठाकुरस्य महिमा-
-मयस्य जीवनस्य आदिभागमवलम्ब्य विरचितम् ।

२८. भगिनीनिवेदितायाः चरितमाश्रित्य किं काव्यमस्ति ?

- श्रीमत्या रमाचौधुरीमहाशयया भगिन्याः निवेदितायाः
पूतचरित्रमाश्रित्य द्वादशदृश्यात्मकं 'निवेदितानिवेदनम्'
इति नाटकं व्यरचयत् ।

२९. नित्यानन्दस्मृतितीर्थमहोदयेन विरचितेषु चरितकाव्येषु
यथेच्छं द्वयोः नाम लिखतु ।

- श्रीशङ्कराचार्यस्य जीवनमवलम्ब्य 'धर्मसंस्थापनम्' इति,
वामाक्ष्यापासाधकस्य जीवनमाश्रित्य 'वामाचरणवैभवम्'
इति नाटकद्वयं नित्यानन्दस्मृतितीर्थेण विरचितेषु
चरितकाव्येषु उल्लेखनीयम् ।

३०. विधानचन्द्ररायस्य जीवनमाश्रित्य किं काव्यं विनिर्मितम् ?

- देशप्रेमिणो विधानचन्द्ररायस्य च भिषक्श्रेष्ठस्य
चरित्रमाश्रित्य नित्यानन्दस्मृतितीर्थमहोदयः पञ्चाङ्कं
दशदृश्यात्मकं 'वङ्गकीर्तिविधानम्' इति नाटकं व्यरचयत् ।

Scanned with CamScanner

२१. रामकृष्णमञ्जलीमिति काव्यं केन विरचितम् ?
- रामकृष्णभावप्रचारे निवेदितप्राणा, द्वादशवर्षतः ब्रह्मचारिणी माता अर्चनापुरी रामकृष्णमञ्जलीमिति चरितकाव्यमरचयत् ।

– सुश्री

02.08.2020.

Scanned with CamScanner